॥ श्री ॥

। गीतगोविन्दं काव्यम् ।

॥ प्रथमः सर्गः ॥

॥ श्लोकाः ॥

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
र्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहः केलयः॥ १

वाग्देवताचरितचित्रितचित्तसद्मा,
पद्मावतीचरणचारणचक्रवर्ती ।
श्रीवासुदेवरतिकेलिकथासमेत-
मेतं करोति जयदेवकविः प्रबन्धम् ॥ २ ॥

यदि हरिस्मरणे सरसं मनो
यदि विलासकलासु कुतूहलम् ।

मधुरकोमलकान्तपदावलीं
शृणु तदा जयदेवसरस्वतीम् ॥ ३ ॥
वाचःपल्लवयत्युमापतिधरः संदर्भशुद्धिं गिरां
जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुतेः ।
शृङ्गारोत्तरसत्प्रमेयवचनैराचार्यगोवर्धन-
स्पर्द्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविक्ष्मा
पतिः ॥ ४ ॥

मालवरागे रूपकताले अष्टपदी ॥ १ ॥

प्रलयपयोधिजले धृतवानसि वेदं
विहितवहित्रचरित्रमखेदम् ।
केशव धृतमीनशरीर जय जगदीश हरे । ध्रुव० ॥१॥
क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे
धरणीधरणकिणचक्रगरिष्ठे ।
केशव धृतकच्छपरूप जय जगदीश हरे ॥ २ ॥
वसति दशनशिखरे धरणी तव लग्ना
शशिनि कलङ्ककलेव निमग्ना ।

केशव, धृतसूकररूप, जय जगदीश हरे ॥ ३ ॥
तव करकमलवरे नखमद्भुतशृङ्गं
दलितहिरण्यकशिपुतनुभृङ्गम् ।
केशव धृतनरहरिरूप जय जगदीश हरे ॥ ४ ॥
छलयसि विक्रमणे बलिमद्भुतवामन
पदनखनीरजनितजनपावन ।
केशव धृतवामनरूप जय जगदीश हरे ॥ ५ ॥
क्षत्रियरुधिरमये जगदपगतपापं
स्नपयसि पयसि शमितभवतापम् ।
केशव धृतभृगुपतिरूप जय जगदीश हरे ॥ ६ ॥
वितरसि दिक्षु रणे दिक्पतिकमनीयं
दशमुखमौलिबलिं रमणीयम् ।
केशव धृतरामशरीर जय जगदीश हरे ॥ ७ ॥
वहसि वपुषि विशदे वसनं जलदाभं
हलहतिभीतिमिलितयमुनाभम् ।
केशव धृतहलधररूप जय जगदीश हरे ॥ ८ ॥
निन्दसि यज्ञविधेरहह श्रुतिजातं

सदयहृदयदर्शितपशुघातम् ।
केशव धृतबुद्धशरीर जय जगदीश हरे ॥ ९ ॥
म्लेञ्च्छनिवहनिधने कलयसि करवालं
धूमकेतुमिव किमपि करालम् ।
केशव धृतकल्किशरीर जय जगदीश हरे ॥१०॥
श्रीजयदेवकवेरिदमुदितमुदारं
शृणु शुभदं सुखदं भवसारम् ।
केशव धृतदशविधरूप जय जगदीश हरे ॥ ११ ॥

॥ श्लोकः ॥

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते,
दैत्यान्दारयते बलिं छलयते क्षत्रक्षयं कुर्वते, ।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते,
म्लेञ्च्छान्मूर्छयते दशाकृतिधृते कृष्णाय तुभ्यं नमः

गुर्जरीरागे प्रतिमण्ठताले अष्टपदी ॥ २ ॥

श्रितकमलाकुचमण्डल धृतकुण्डल ए
कलितललितवनमाल जय जय देव हरे ॥ध्रु०॥१

दिनमणिमण्डलमण्डन; भवखण्डन; ए
मुनिजनमानसहंस; जय जय देव हरे ॥ २ ॥

कालियविषधरगञ्जन, जनरञ्जन, ए
यदुकुलनलिनदिनेश; जय जय देव हरे ॥ ३ ॥

मधुमुरनरकविनाशन; गरुडासन; ए
सुरकुलकेलिनिदान; जय जय देव हरे ॥ ४ ॥

अमलकमलदललोचन; भवमोचन; ए
त्रिभुवनभवननिधान; जय जय देव हरे ॥ ५ ॥

जनकसुताकृतभूषण; जितदूषण; ए
समरशमितदशकण्ठ; जय जय देव हरे ॥ ६ ॥

अभिनवजलधरसुन्दर; धृतमन्दर; ए
श्रीमुखचन्द्रचकोर; जय जय देव हरे ॥ ७ ॥

तव चरणे प्रणता वयमिति भावय; ए
कुरु कुशलं प्रणतेषु; जय जय देव हरे ॥ ८ ॥

श्रीजयदेवकवेरिदं कुरुते मुदं
मङ्गलमुज्ज्वलगीतं जय जय देव हरे ॥ ९ ॥

॥ श्लोकः ॥

पद्मापयोधरतटीपरिरम्भलग्न-
काश्मीरमुद्रितमुरो मधुसूदनस्य ।
व्यक्तानुरागमिव खेलदनङ्गखेद-
स्वेदाम्बुपूरमनुपूरयतु प्रियं वः ॥ ६ ॥
वसन्ते वासन्तीकुसुमसुकुमारैरवयवै-
र्भ्रमन्तीं कान्तारे बहुविहितकृष्णानुसरणाम् ।
अमन्दं कन्दर्पज्वरजनितचिन्ताकुलतया
चलद्बाधां राधां सरसमिदमूचे सहचरी ॥ ७ ॥

वसन्तरागे रूपकताले अष्टपदी ॥ ३ ॥

ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे ।
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे १
विहरति हरिरिह सरसवसन्ते ।
नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते
॥ ध्रुव० ॥
उन्मदमदनमनोरथपथिकवधूजनजनितविलापे ।

अलिकुलसंकुलकुसुमसमूहनिराकुलबकुलकलापे ॥२॥
मृगमदसौरभरभसवशंवदनवदलमालतमाले ।
युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले ॥३॥
मदनमहीपतिकनकदण्डरुचिकेशरकुसुमविकासे ।
मिलितशिलीमुखपाटलिपटलकृतस्मरतूणविलासे ॥४॥
विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे
विरहिनिकृन्तनकुन्तमुखाकृतिकेतकिदन्तुरिताशे ॥५॥
माधविकापरिमलललिते नवमालतिजातिसुगन्धौ ।
मुनिमनसामपिमोहनकारिणितरुणाकारणबन्धौ ॥६॥
स्फुरदतिमुक्तलतापरिरम्भणमुकुलितपुलकितचूते ।
वृन्दावनविपिने परिसरपरिगतयमुनाजलपूते ॥७॥
श्रीजयदेवभणितमिदमुदयतु हरिचरणस्मृतिसारम् ।
सरसवसन्तसमयवनवर्णनमनुगतमदनविकारम् ॥८॥

॥ श्लोकः ॥

दरविदलितमल्लीवल्लिचञ्चत्पराग-
प्रकटितपटवासैर्वासयन्काननानि ।

इह हि दहति चेतः केतकीगन्धबन्धुः
प्रसरदसमबाणप्राणवद्गन्धवाहः ॥ ८ ॥

उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः,
नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण-
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥ ९

अनेकनारीपरिरम्भसंभ्रम-
स्फुरन्मनोहारिविलासलालसम् ।
मुरारिमारादुपदर्शयन्त्यसौ
सखी समक्षं पुनराह राधिकाम् ॥ १० ॥

रामकरिरागे रूपकताले अष्टपदी ॥ ४ ॥

चन्दनचर्चितनीलकलेवरपीतवसनवनमाली । के-
लिचलन्मणिकुण्डलमण्डितगण्डयुगस्मितशाली ।
हरिरिह मुग्धवधूनिकरे विलासिनि विलसति केलिपरे
ध्रुव० ॥ १ ॥

पीनपयोधरभारभरेण हरिं परिरभ्य सरागम् ।

गोपवधूरनुगायति काचिदुदञ्चितपञ्चमरागम् २॥
कापि विलासविलोलविलोचनखेलनजनितमनोजं।
ध्यायतिमुग्धवधूरधिकं मधुसूदनवदनसरोजम् ॥३ ॥
कापि कपोलतले मिलिता लपितुं किमपिश्रुतिमूले
चारु चुचुम्ब नितम्बवती दयितं पुलकैरनुकूले॥४॥
केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूले ।
मञ्जुलवञ्जुलकुञ्जगतं विचकर्ष करेण दुकूले॥ ५
करतलतालतरलवलयावलिकलितकलस्वनवंशे ।
रासरसे सह नृत्यपरा हरिणा युवतिः प्रशशंसे ॥६॥
श्लिष्यति कामपिचुम्बतिकामपिरमयतिकामपिरामां,
पश्यति सस्मितचारुपरांमपरामनुगच्छतिवामां॥ ७॥
श्रीजयदेवभणितमिदमद्भुतकेशवकेलिरहस्यम् ।
वृन्दावनविपिनेललितं वितनोतु शुभानि यशस्यम् ८

॥ श्लोकः ॥

विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवर-
श्रेणीश्यामलकोमलैरुपनयन्नङ्गैरनङ्गोत्सवम् ।

स्वच्छन्दं व्रजसुन्दरीभिरभितःप्रत्यङ्गमालिङ्गितः,
शृङ्गारः सखि मूर्तिमानिव मधौ मुग्धो हरिः क्री-
डति ॥ ११ ॥

अद्योत्सङ्गवसद्भुजङ्गकवलक्लेशादिवेशाचल-
प्रालेयप्लवनेच्छयानुसरति श्रीखण्डशैलानिलः ।
किंचित्स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदया-
दुन्मीलन्ति कुहूः कुहूरिति कलोत्तालाः पिकानां
गिरः ॥ १२ ॥

रासोल्लासभरेणविभ्रमभृतामाभीरवामभ्रुवा-
मभ्यर्णं परिरभ्य निर्भरमुरः प्रेमान्धया राधया ।
साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुति-
व्याजादुद्भटचुम्बितःस्मितमनोहारी हरिः पातु वः
॥ १३ ॥

इतिश्रीकविराजजयदेवकृते गीतगोविन्दे
सामोदामोदरो नाम प्रथमः सर्गः ॥ १ ॥

॥ द्वितीयः सर्गः ॥

॥ श्लोकः ॥

विहरति वने राधा साधारणप्रणये हरौ
विगलितनिजोत्कर्षादीर्ष्यावशेन गतान्यतः ।
क्वचिदपि लताकुञ्जे गुञ्जन्मधुव्रतमण्डली-
मुखरशिखरे लीना दीनाप्युवाच रहः सखीम् ॥ १

॥ गुर्जरीरागे रूपकताले अष्टपदी ॥ १ ॥

सञ्चरदधरसुधामधुरध्वनिमुखरितमोहनवंशम्
चलितदृगञ्चलचञ्चलमौलिकपोलविलोलवतंसम्
रासे हरिमिह विहितविलासं स्मरति मनो मम
कृतपरिहासम् ॥ ध्रु० ॥ १ ॥
चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशम् ।
प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदिरसुवेशम् ।
रासे० ॥ २ ॥

गोपकदम्बनितम्बवतीमुखचुम्बनलम्भितलोभम्।
बन्धुजीवमधुराधरपल्लवमुल्लसितस्मितशोभम् ।
रासे० ॥ ३ ॥
विपुलपुलकभुजपल्लववलयितबल्लवयुवतिसहस्रम् ।
करचरणोरसिमणिगणभूषणाकिरणविभिन्नतमि-
स्रम् ॥ रासे० ॥ ४ ॥
जलदपटलचलदिन्दुविनिन्दकचन्दनतिलकललाटं
पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटम् ॥५॥
मणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारम् ।
पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारम्।
रासे० ॥ ६ ॥
विशदकदम्बतलेमिलितं कलिकलुषभयं शमयन्तम्
मामपि किमपि तरङ्गदनङ्गदृशा मनसा रमय-
न्तम् ॥ रासे०॥ ७ ॥
श्रीजयदेवभणितमतिसुन्दरमोहनमधुरिपुरूपम् ।
हरिचरणस्मरणं प्रति संप्रति पुण्यवतामनुरूपम्।
रासे० ॥ ८ ॥

॥ श्लोकः ॥

गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते
वहति च परीतोषं दोषं विमुञ्चति दूरतः ।
युवतिषु चलत्तृष्णे कृष्णे विहारिणि मां विना
पुनरपि मनो वामं कामं करोति करोमि किम् ॥२॥

मालवरागे एकतालीताले अष्टपदी ॥ २ ॥

निभृतनिकुञ्जगृहंगतया निशिरहसि निलीयवसन्तं
चकितविलोकितसकलदिशारतिरभसभरेण हसन्तं
सखि हे केशिमथनमुदारम् ।
रमय मयासह मदनमनोरथभावितया सविकारम् ।
॥ ध्रुं० ॥ १ ॥

प्रथमसमागमलज्जितया पटु चाटु शतैरनुकूलम् ।
मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलम्
किसलयशयननिवेशितयाचिरमुरसि ममैव शयानम् ।
कृतपरिरम्भणचुम्बनया परिरभ्य कृताधरपानम् ॥३
अलसनिमीलितलोचनया पुलकावलिललितकपोलं

श्रमजलसिक्तकलेवरया वरमदनमदादतिलोलम् ४
कोकिलकलरवकूजितयाजितमनसिजतन्त्रविचारम्
श्लथकुसुमाकुलकुन्तलया नखलिखितघनस्तनभारं ।
चरणरणितमणिनूपुरया परिपूरितसुरतवितानम् ।
मुखरविशृंखलमेखलया सकचग्रहचुम्बनदानम् ।६
रतिसुखसमयरसालसया दरमुकुलितनयनसरोजम् ।
निःसहनिपतिततनुलतया मधुसूदनमुदितमनोजम्
श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलम्
सुखमुत्कण्ठितराधिकया कथितं वितनोतु सलीलम्

॥ श्लोकः ॥

हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिमद्बल्लवी-
वृन्दोत्सारिदृगन्तवीक्षितमतिस्वेदार्द्रगण्डस्थलम् ।
मामुद्वीक्ष्यविलज्जितस्मितसुधामुग्धाननं कानने
गोविन्दं व्रजसुन्दरीगणवृतं पश्यामि हृष्यामि च ३
दुरालोकस्तोकस्तबकनवकाशोकलतिका-
विकासःकासारोपवनपवनोऽपिव्यथयति ।

अपि भ्राम्यद्भृङ्गीरणितरमणीया न मुकुल-
प्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति ॥४॥
साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासित-
भ्रूवल्लीकमलीकदर्शितभुजावालार्द्धहस्तस्तनम् ।
गोपीनां निभृतंनिरीक्ष्य ललितां कांचिच्चिरं चिन्तय-
न्नन्तर्मुग्धमनोहरो हरतु वः क्लेशं नवः केशवः ॥ ५ ॥
इतिश्रीगीतगोविन्दे अक्लेशकेशवोनाम द्वि॰सर्गः २

तृतीयः सर्गः प्रारंभः

॥ श्लोकाः ॥

कंसारिरपि संसारवासनाबन्धशृंखलाम् ।
राधामाधायहृदये तत्याज व्रजसुन्दरीः॥१॥
इतस्ततस्तामनुसृत्य राधिका-
मनङ्गबाणव्रणखिन्नमानसः ।

कृतानुतापः स कलिन्दनन्दिनी-
तटान्तकुञ्जे निषसाद माधवः ॥ २ ॥

गुर्जरीरागे प्रतिमण्ठताले अष्टप० ॥ १ ॥

मामियं चलिता विलोक्य वृतं वधूनिचयेन ।
सापराधतया मयापि न वारितातिभयेन ।
हरि हरि हतादरतया गता सा कुपितेव ॥ ध्रु०॥१॥
किं करिष्यति किं वदिष्यति सा चिरं विरहेण ॥
किं धनेन जनेन किं मम जीवितेन गृहेण ॥ २ ॥
चिन्तयामि तदाननं कुटिलभ्रुरोषभरेण ।
शोणपद्मामिवोपरिभ्रमताकुलं भ्रमरेण ॥हरि० ॥ ३॥
तामहं हृदिसंगतामनिशं भृशं रमयामि ।
किं वनेऽनुसरामितामिह किं वृथा विलपामि॥ह० ४
तन्वि खिन्नमसूयया हृदयं तवाकलयामि ।
तन्न वेद्मि कुतो गतासि नते न तेऽनुनयामि॥ह०॥५
दृश्यसे पुरतो गता गतमेव मे विदधासि ।
किं पुरेव ससंभ्रमं परिरम्भणं न ददासि ॥ हरि०॥६

क्षम्यतामपरं कदापि तवेदृशं न करोमि ।
देहि सुन्दरि दर्शनं मम मन्मथेन दुनोमि । हरि० ॥७
वर्णितं जयदेवकेन हरेरिदं प्रणतेन ।
किन्दुबिल्वसमुद्रसंभवरोहिणीरमणेन । हरि० ॥८॥

॥ श्लोकः ॥

भ्रूपल्लवो धनुरपाङ्गतरङ्गितानि
बाणा गुणः श्रवणपालिरिति स्मरेण ।
तस्यामनङ्गजयजङ्गमदेवताया-
मस्त्राणि निर्जितजगन्ति किमर्पितानि ॥ ३ ॥
हृदि बिसलताहारो नायं भुजङ्गमनायकः
कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः ।
मलयजरजो नेदं भस्म प्रियारहिते मयि
प्रहर न हरभ्रान्त्यानङ्ग क्रुधा किमु धावसि ॥४॥
पाणौ मा कुरु चूतसायकममुं मा चापमारोपय
क्रीडानिर्जितविश्व मूर्छितजनाघातेन किं पौरुषम्
तस्या एव मृगीदृशो मनसिजप्रेङ्खत्कटाक्षानल-

ज्वालाजर्जरितं मनागपि मनो नाद्यापि संधुक्षते ॥५
भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथां
श्यामात्माकुटिलःकरोतु कबरीभारोऽपि मारोद्यमम्।
मोहं तावदयं च तन्वि तनुतां बिम्बाधरो रागवान्
सद्वृत्तस्तनमण्डलस्तव कथं प्राणैर्मम क्रीडति ॥६॥
तानि स्पर्शसुखानि ते च तरलाःस्निग्धा दृशोर्विभ्रमा-
स्तद्वक्त्राम्बुजसौरभं स च सुधास्यन्दी गिरां वक्रिमा
सा बिम्बाधरमाधुरीति विषयासङ्गेऽपि मन्मानसं
तस्यां लग्नसमाधि हन्त विरहव्याधिः कथं वर्तते ।७
तिर्यक्कण्ठविलोलमौलितरलोत्तंसस्य वंशोच्चर-
द्गीतस्थानकृतावधानललनालक्षैर्न संलक्षिताः ।
संमुग्धं मधुसूदनस्य मधुरे राधामुखेन्दौ मृदु-
स्पन्दं पल्लवितांश्चिरं ददतु वः क्षेमं कटाक्षोर्मयः ।८

इतिश्रीगीतगोविन्दे मुग्धमधुसूदनो नाम तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः प्रारभ्यते

॥ श्लोकः ॥

यमुनातीरवानीरनिकुञ्जे मन्दमास्थितम्
प्राह प्रेमभरोद्भ्रान्तं माधवं राधिकासखी ॥ १॥

कर्णाटकरागे एकतालीताले अष्टपदी ॥ ९ ॥

निन्दति चन्दनमिन्दुकिरणमनुविन्दति खेदमधीरम् ।
व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरम्
सा विरहे तव दीना माधव मनसिजविशिखभयादिव
भावनया त्वयि लीना ॥ ध्रु० ॥१॥

अविरलनिपतितमदनशरादिव भवदवनाय विशालं
स्वहृदयमर्मणि वर्म करोति सजलनलिनीदलजालं २
कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयम्
व्रतमिव तव परिरम्भसुखाय करोति कुसुमशयनीयं ३
वहति च चलितविलोचनजलधरमाननकमलमुदारम्
विधुमिव विकटविधुंतुददन्तदलनगलितामृतधारं ४

विलिखतिरहसि कुरङ्गमदेन भवन्तमसमशरभूतम् ।
प्रणमति मकरमधो विनिधाय करे च शरं नवचूतं ५
प्रतिपदमिदमपि निगदति माधव तवचरणेपतिताहं
त्वयिविमुखे मयि सपदिसुधानिधिरपितनुतेतनुदाहं ६
ध्यानलयेन पुरः परिकल्प्य भवन्तमतीव दुरापम् ।
विलपतिहसतिविषीदतिरोदिति चञ्चतिमुंचतितापं
श्रीजयदेवभणितमिदमधिकं यदिमनसानटनीयम् ।
हरिविरहाकुलवल्लवयुवतिसखीवचनं पठनीयम् ॥८॥

॥ श्लोकः ॥

आवासो विपिनायते प्रियसखी मालापि जालायते
तापोऽपिश्वसितेनदावदहनज्वालाकलापायते ।
सापि त्वद्विरहेण हन्त हरिणी रूपायते हा कथं
कन्दर्पोऽपि यमायते विरचयन्शार्दूलविक्रीडितम् २

देशाखरागे एकतालीताले अपष्टदी ॥ २ ॥

स्तनविनिहितमपि हारमुदारम्
सा मनुते कृशतनुरतिभारम् ।

राधिका विरहे तव केशव । ध्रु० ॥ १ ॥
सरसमसृणमपिमलयजपङ्कम् ।
पश्यति विषमिव वपुषि सशङ्कम् । रा० ॥ २ ॥
श्वसितपवनमनुपमपरिणाहम् ।
मदनदहनमिववहति सदाहम् । रा० ॥ ३ ॥
दिशि दिशि किरति सजलकणजालम् ।
नयननलिनमिवविगलितनालम् । रा० ॥ ४ ॥
नयनविषयमपि किसलयतल्पम् ।
गणयति विहितहुताशविकल्पम् । रा० ॥५॥
त्यजति न पाणितलेन कपोलम् ।
बालशशिनमिव सायमलोलम् । रा० ॥ ६ ॥
हरिरिति हरिरिति जपति सकामम् ।
विरहविहितमरणेव निकामम् । रा० ॥ ७ ॥
श्रीजयदेवभणितमिति गीतम् ।
सुखयतु केशवपदमुपनीतम् । रा० ॥ ८ ॥

॥ श्लोकः ॥

सा रोमाञ्चति सीत्करोति विलपत्युत्कम्पते ताम्यति

ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मुर्छत्यपि ।
एतावत्यतनुज्वरे वरतनुर्जीवेन्न किं ते रसा-
त्स्वर्वैद्यप्रतिम प्रसीदसि यदि त्यक्तोऽन्यथा हस्तकः ३

स्मरातुरां दैवतवैद्यहृद्य-
त्वदंगसंगामृतमात्रसाध्याम् ।
विमुक्तबाधां कुरुषे न राधा-
मुपेंद्रवज्रादपि दारुणोऽसि ॥ ४ ॥

कदर्पज्वरसंज्वराकुलतनोराश्चर्यमस्याश्चिरं
चेतश्चंदनचंद्रमःकमालिनीचिंतासु ताम्यत्यपि ।
किंतु क्षान्तिवशेन शीतलतनुं त्वामेकमेव प्रियं
ध्यायंती रहसिस्थिता कथमपि क्षीणा क्षणं प्रा-
णिति ॥ ५ ॥

क्षणमपि विरहःपुरा न सेहे
नयननिमीलनखिन्नया यया ते ।
श्वसिति कथमसौ रसालशाखां
चिरविरहेण विलोक्य पुष्पिताग्राम् ॥ ६ ॥

वृष्टिव्याकुलगोकुलावनवशादुद्धृत्य गोवर्धनं

बिभ्रद्वल्लवसुंदरीभिरधिकानंदाच्चिरंचुंबितः ॥
कंदर्पेण तदर्पिताधरतटीसिंदूरमुद्रांकितो
बाहुर्गोपतनोस्तनोतुभवतां श्रेयांसि कंसद्विषः ७
इति श्रीगीतगोविंदे स्निग्धमाधवो नाम चतुर्थः
सर्गः ॥ ४

पंचमः सर्गः प्रारभ्यते

॥ श्लोकः ॥

अहमिह निवसामि याहि राधा-
मनुनय मद्वचनेन चानयेथाः ॥
इति मधुरिपुणा सखी नियुक्ता
स्वयमिदमेत्य पुनर्जगाद राधाम् ॥ १ ॥

देशवराडिरागे रूपकताले अष्टपदी १

वहति मलयसमीरे मदनमुपनिधाय ।

स्फुटतिकुसुमनिकरे विरहिहृदयदलनाय ।
तव विरहे वनमाली सखि सीदति ॥ ध्रु० ॥ १ ॥
दहति शिशिरमयूखे मरणमनुकरोति ।
पतति मदनविशिखे विलपति विकलतरोऽति ॥२॥
ध्वनति मधुपसमूहे श्रवणमपिदधाति ।
मनसि वलितविरहे निशि निशि रुजमुपयाति ॥३
वसति विपिनविताने त्यजति ललितमपि धाम ।
लुठति धरणिशयने बहु विलपति तव नाम ॥४ ॥
भणति कविजयदेव इतिविरहिविलसितेन ।
मनसि रभसविभवे हरिरुदयतु सुकृतेन ॥ ५ ॥

॥ श्लोकः ॥

पूर्वं यत्र समं त्वया रतिपतेरासादिताःसिद्धय-
स्तस्मिन्नेव निकुंजमन्मथमहातीर्थे पुनर्माधवः ।
ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमन्त्रावलिं
भूयस्त्वत्कुचकुम्भनिर्भरपरीरम्भामृतंवांछति ॥ २ ॥

गुर्जरीरागे एकतालीताले अष्टपदी २

रतिसुखसारे गतमभिसारे मदनमनोहरवेशं
न कुरु नितम्बिनि गमनविलम्बनमनुसर तं हृदयेशं।
धीरसमीरे यमुनातीरे वसति वने वनमाली
गोपीपीनपयोधरमर्दनचञ्चलकरयुगशाली । ध्रु० १
नामसमेतं कृतसङ्केतं वादयते मृदु वेणुम् ।
बहु मनुते ननु ते तनुसङ्गतपवनचलितमपि रेणुम् २
पतति पतत्रे विचलति गात्रे शङ्कितभवदुपयानम् ।
रचयति शयनं सचकितनयनं पश्यति तव पन्थानं ३
मुखरमधीरं त्यज मंजीरं रिपुमिव केलिसुलोलम् ।
चल सखिकुञ्जं सतिमिरपुञ्जं शीलय नीलनिचोलं
उरसि मुरारेरुपहितहारे घन इव तरलबलाके ।
तडिदिव पीते रतिविपरीते राजसि सुकृतविपाके ५
विगलितवसनं परिहृतरशनं घटय जघनमपिधानम्
किसलशयने पङ्कजनयने निधिमिव हर्षनिधानम्॥ ६
हरिरभिमानी रजनिरिदानीमियमपि याति विरामम्।
कुरु मम वचनं सत्वररचनं पूरय मधुरिपुकामम् ॥ ७

श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयम् ।
प्रमुदितहृदयं हरिमतिसदयं नमत सुकृतकमनीयम्
धीसमीरेयमुना० ॥ ८॥

॥ श्लोक ॥

विकिरति मुहुः श्वासानाशाःपुरो मुहुरीक्षते ।
प्रविशतिमुहुः कुञ्जं गुंञ्जन्मुहुर्बहु ताम्यति ।
रचयति मुहुः शय्यां पर्याकुलं मुहुरीक्षते ।
मदनकदनक्लान्तः कान्ते प्रियस्तव वर्तते ॥ ३ ॥
त्वद्वाक्येन समं समग्रमधुना तिग्मांशुरस्तं गतो
गोविन्दस्य मनोरथेन च समं प्राप्तं तमः सान्द्रताम्।
कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना ।
तन्मुग्धे विफलं विलम्बनमसौ रम्योऽभिसारक्षणः ४
आश्लेषादनु चुम्बनादनु नखोल्लेखादनु स्वान्तजा-
त्प्रोद्बोधादनु सम्भ्रमादनु रतारम्भादनु प्रीतयोः ।
अन्यार्थं गतयोर्भ्रमान्मिलितयोः सम्भाषणैर्जानतो-
र्दम्पत्योर्निशिकोनकोनतमासिव्रीडाविमिश्रोरसः ॥५

सभयचकितं विन्यस्यन्तीं दृशं तिमिरे पथि
प्रतितरु मुहुः स्थित्वा मन्दं पदानि वितन्वतीम् ।
कथमपि रहः प्राप्तामङ्गैरनङ्गतरङ्गिभिः
सुमुखि सुभगः पश्यन्स त्वामुपैतु कृतार्थताम् ॥६

राधामुग्धमुखारविन्दमधुपस्त्रैलोक्यमौलिस्थली-
नेपथ्योचितनीलरत्नमवनीभारावतारक्षमः ।
स्वच्छन्दंव्रजसुन्दरीजनमनस्तोषप्रदोषश्चिरं
कंसध्वंसनधूमकेतुरवतु त्वां देवकीनन्दनः ॥ ७ ॥

इतिश्रीगीतगोविन्देऽभिसारिकासाकांक्षपुण्ड-
रीकाक्षोनाम पञ्चमः सर्गः ॥ ५ ॥

अथ षष्ठः सर्गःप्रारभ्यते

॥ आर्या ॥

अथ तां गन्तुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा।
तच्चरितं गोविन्दे मनसिजमन्दे सखी प्राह ॥ १ ॥

गुणकरीरागे रूपकताले अष्टपदी ॥ १

पश्यति दिशि दिशि रहसि भवन्तम् ।
त्वदधरमधुरमधूनि पिबन्तम् ।
नाथ हरे जय नाथ हरे सीदति राधावासगृहे ध्रु० १
त्वदभिसरणरभसेन वलन्ती ।
पतति पदानि कियन्ति चलन्ती नाथह० ॥२ ॥
विहितविशदबिसकिसलयवलया ।
जीवति परमिह तव रतिकलया नाथह०॥ ३ ॥
मुहुरवलोकितमण्डनलीला ।
मधुरिपुरहमिति भावनशीला नाथहरे० ॥ ४ ॥
त्वरितमुपैति न कथमभिसारम् ।
हरिरिति वदति सखीमनुवारम् नाथह० ॥ ५ ॥
श्लिष्यतिचुम्बति जलधरकल्पम् ।
हरिरुपगतइति तिमिरमनल्पम् नाथहरे० ॥ ६ ॥
भवति विलम्बिनि विगलितलज्जा ।
विलपति रोदिति वासकसज्जा नाथहरे०॥ ७ ॥
श्रीजयदेवकवेरिदमुदितम् ।

गसिकजनं तनुतामतिमुदितम् नाथहरे० ॥ ८

॥ श्लोकः ॥

विपुलपुलकपालिः स्फीतसीत्कारमन्त-
र्जनितजडिमकाकुव्याकुलं व्याहरन्ती ।
तव कितव विधाया मन्दकन्दर्पचिन्तां
रसजलनिधिमग्ना ध्यानलग्ना मृगाक्षी ॥ २ ॥
अङ्गेष्वाभरणं करोति बहुशः पत्रेऽपि सञ्चारिणि
प्राप्तं त्वां परिशङ्कते वितनुते शय्यां चिरं ध्यायति
इत्याकल्पविकल्पतल्परचना संकल्पलीलाशत-
व्यासक्तापि विना त्वया वरतनुर्नैषा निशां नेष्यति ३
किं विश्राम्यसि कृष्ण भोगिभवने भाण्डीरभूमीरुहि
भ्रातर्यासि न दृष्टिगोचरमितः सानन्दनन्दास्पदम् ।
राधाया वचनं तदध्वगमुखान्नन्दान्तिके गोपतो
गोविन्दस्य जयन्तिसायमतिथिप्राशस्त्यगर्भागिरः ४

इति श्रीगीतगोविन्दे वासकसज्जावर्णनेसोत्कण्ठ-
वैकुण्ठोनामषष्ठःसर्गः ॥ ६ ॥

अथ सप्तमः सर्गः प्रारभ्यते

॥ श्लोकः ॥

अत्रान्तरे च कुलटाकुलवर्त्मपात-
संजातपातक इव स्फुटलाञ्छनश्रीः ।
वृन्दावनान्तरमदीपयदंशुजालै-
र्दिक्सुन्दरीवदनचन्दनबिन्दुरिन्दुः ॥ १ ॥

॥ आर्या ॥

प्रसरति शशधरबिम्बे विहितविलम्बे च माधवे विधुरा
विरचितविविधविलापं सा परितापं चकारोच्चैः ॥२॥

गौडमालवरागे प्रतिमण्ठताले अष्टपदी ॥ १ ॥

कथितसमयेऽपि हरिरहह न ययौ वनम् ।
मम विफलमेतदनुरूपमपि यौवनम् ।
यामि हे कमिह शरणं सखीजनवचनवञ्चिता ध्रु १

यदनुगमनाय निशि गहनमपि शीलितम् ।
तेन मम हृदयमिदमसमशरकीलितम्।यामि० २
मम मरणमेव वरमतिवितथकेतना ।
किमिति विषहामि विरहानलमचेतना । यामि०॥३
मामहह विधुरयति मधुरमधुयामिनी ।
कापि हरिमनुभवति कृतसुकृतकामिनी।यामि०॥४
अहह कलयामि वलयादि मणिभूषणम् ।
हरिविरहदहनवहनेन बहुदूषणम् । यामि० ॥ ५ ॥
कुसुमसुकुमारतनुमतनुशरलीलया ।
स्रगपि हृदि हन्ति मामतिविषमशीलया ।यामि० ६
अहमिह निवसामि न गणितवनवेतसा ।
स्मरति मधुसूदनो मामपि न चेतसा । यामि०॥७॥
हरिचरणशरणजयदेवकविभारती ।
वसतु हृदि युवतिरिव कोमलकलावती । यामि० ८

॥श्लोकः॥

तत्किं कामपि कामिनीमभिसृतः किंवा कलाकेलिभि
र्बद्धो बन्धुभिरन्धकारिणि वनोपान्ते किमु भ्राम्यति।

कान्तः क्लान्तमना मनागपि पथि प्रस्थातुमेवाक्षमः
संकेतीकृतमञ्जुवञ्जुललताकुञ्जेऽपि यन्नागतः॥ ३

अथागतां माधवमन्तरेण
सखीमियं वीक्ष्य विषादमूकाम् ।
विशङ्कमाना रमितं कयापि
जनार्दनं दृष्टवदेतदाह ॥ ४ ॥

वसन्तरागे एकतालीताले अष्टपदी ॥ २ ॥

स्मरसमरोचितविरचितवेषा ।
गलितकुसुमदलविलुलितकेशा ।
कापि चपला मधुरिपुणा ।
विलसति युवतिरधिकगुणा ॥ धृ० ॥ १ ॥

हरिपरिरम्भणवलितविकारा ।
कुचकलशोपरि तरलितहारा । कापि० ॥ २ ॥

विचलदलकललिताननचन्द्रा ।
तदधरपानरभसकृततन्द्रा ॥ कापिच० ॥ ३ ॥

चञ्चलकुण्डलदलितकपोला ।

मुखरितरशनजघनगतिलोला । कापिच० ॥४॥
दयितविलोकितलज्जितहसिता ।
बहुविधकूजितरतिरसभरिता । कापिच० ॥५॥
विपुलपुलकपृथुवेपथुभङ्गा ।
श्वसितनिमीलितविकसदनङ्गा ॥ का० ॥ ६ ॥
श्रमजलकणभरसुभगशरीरा ।
परिपतितोरसि रतिरणधीरा । कापिच०॥ ७ ॥
श्रीजयदेवभणितहरिरभितम् ।
कलिकलुषं जनयतु परिरमितम् । कापिच० ॥८॥

॥ श्लोकः ॥

विरहपाण्डुमुरारिमुखाम्बुज-
द्युतिरयं तिरयन्नपि वेदनाम् ।
विधुरतीव तनोति मनोभुवः
सुहृदये हृदये मदनव्यथाम् ॥ ५ ॥

गुर्जरीरागे एकतालीताले अष्टपदी ॥ ३ ॥

समुदितमदने रमणीवदने चुम्बनवलिताधरे ।

मृगमदतिलकं लिखति सपुलकं मृगमिव रजनीकरे
रमते यमुनापुलिनवने विजयी मुररिपुरधुना ॥ १ ॥
घनचयरुचिरे रचयति चिकुरे तरलिततरुणानने ।
कुरुबककुसुमं चपलासुषमं रतिपतिमृगकानने ॥२॥
घटयति सुघने कुचयुगगगने मृगमदरुचिरूषिते ।
मणिसरममलं तारकपटलं नगपदशशिभूषिते ॥३॥
जितबिसशकले मृदुभुजयुगले करतलनलिनीदले ।
मरकतवलयं मधुकरनिचयं वितरति हिमशीतले॥४
रतिगृहजघने विपुलापघने मनसिजकनकासने ।
मणिमयरशनं तोरणहसनं विकिरति कृतवासने॥५॥
चरणकिसलये कमलानिलये नखमणिगणपूजिते ।
बहिरपवरणं यावकभरणं जनयति हृदि योजिते॥६
रमयतिसुदृशं कामपि सदृशं खलहलधरसोदरे।
किमफलमवसं वद सखि विरसं चिरमिह विट-
पोदरे॥ ७ ॥
इह रसभणने कृतहरिगुणने मधुरिपुपदसेवके।
कलियुगचरितं न वसतु दुरितं कविनृपजयदेवके ।

॥ श्लोकः ॥

नायातः सखि निर्दयो यदि शठस्त्वं दूति किं दूयसे
स्वच्छन्दं बहुवल्लभः स रमते किं तत्र ते दूषणम्।
पश्याद्य प्रियसंगमाय दयितस्याकृष्यमाणं गुणै-
रुत्कण्ठार्तिभरादिव स्फुटदिदं चेतः स्वयं यास्यति

देशांकरागे रूपकताले अष्टपदी ॥ ४ ॥

अनिलतरलकुवलयनयनेन ।
तपति न सा किसलयशयनेन ।
सखि या रमिता वनमालिना ॥ ध्रु० ॥ १ ॥
विकसितसरसिजललितमुखेन ।
स्फुटति न सा मनसिजविशिखेन ॥ २ ॥
अमृतमधुरमृदुतरवचनेन ।
ज्वलति न सा मलयजपवनेन ॥ ३ ॥
स्थलजलरुहरुचिरकरचरणेन ।
दहति न सा हिमकरकिरणेन ॥ ४ ॥
सजलजलदसमुदयरुचिरेण ।

दलति न सा हृदि विरहभरेण ॥ ५ ॥
कनकनिकषरुचिशुचिवसनेन ।
श्वसिति न सा परिजनहसनेन ॥ ६ ॥
सकलभुवनजनवरतरुणेन ।
वहति न सा रुजमतिकरुणेन ॥ ७ ॥
श्रीजयदेवभणितरमणेन ।
प्रविशतु हरिरपि हृदयमनेन ॥ ८ ॥

॥ श्लोकः ॥

मनोभवानन्दन चन्दनानिल
प्रसीद रे दक्षिण मुञ्च वामताम् ।
क्षणं जगत्प्राण विधाय माधवं
पुरो मम प्राणहरो भविष्यसि ॥ ७ ॥
रिपुरिव सखीसंवासोऽयं शिखीव हिमानिलो
विषमिव सुधारश्मिर्दूरं दुनोति मनोगते ।
हृदयमदये तस्मिन्नेवं पुनर्वलते बला-
त्कुवलयदृशां वामः कामो निकामनिरंकुशः॥ ८ ॥

बाधां विदेहिमलयानिलपञ्चबाण
प्राणान्गृहाण न गृहं पुनराश्रयिष्ये ।
किंते कृतान्तभगिनि क्षमया तरङ्गै-
रङ्गानि सिञ्च मम श्याम्यतु देहदाहः ॥ ९ ॥
सान्द्रानन्दपुरन्दरादिदिविषद्वृन्दैरमन्दादरा-
दानम्रैर्मुकुटेन्द्रनीलमणिभिःसंदर्शितेन्दीवरम् ।
स्वच्छन्दं मकरन्दसुन्दरगलन्मन्दाकिनीमेदुरं
श्रीगोविन्दपदारविन्दमशुभस्कन्दाय वन्दामहे॥१०
इतिश्रीगीतगोविन्देनागरनारायणोनामसप्तमःसर्गः

अथाष्टमः सर्गः प्रारभ्यते

॥श्लोकः॥

अथ कथमपि यामिनीं निनीय
स्मरशरजर्जरितापि सा प्रभाते ।

अनुनयवचनं वदन्तमग्रे
प्रणतमपि प्रियमाह साभ्यसूयम् ॥ १ ॥

भैरवीरागे रूपकताले अष्टपदी ॥ ४ ॥

रजनिजनितगुरुजागररागकषायितमलसनिमेषम्
वहतिनयनमनुरागमिव स्फुटमुदितरसाभिनिवेशम् ।
हरि हरि याहि माधव याहि केशव मा वद कैतववादं।
तामनुसर सरसीरुहलोचन या तव हरति विषादम् ।
॥ ध्रु० ॥ १ ॥
कज्जलमलिनविलोचनचुम्बनविरचितनीलिमरूपं।
दशनवसनमरुणं तव कृष्ण तनोति तनोरनुरूपम्॥ २
वपुरनुवहति तव स्मरसङ्गरखरनखरक्षतरेखम् ।
मरकतशकलकलितकलधौतलिपेरिव रतिजयलेखं
चरणकमलगलदलक्तकसिक्तमिदं तवहृदय मुदारं
दर्शयतीव बहिर्मदनद्रुमनवकिसलयपरिवारम् ॥ ४॥
दशनपदं भवदधरगतं मम जनयति चेतसि खेदम् ।
कथयति कथमधुनापि मया सह तव वपुरेतदभेदम्।
बहिरिव मलिनतरं तव कृष्ण मनोऽपि भविष्यति नूनं

कथमथ वञ्चयसे जनमनुगतमसमशरज्वरदूनम् ॥६
भ्रमति भवानबलाकवलाय वनेषु किमत्र विचित्रम्।
प्रथयति पूतनिकैव वधूवधनिर्दयबालचरित्रम् ॥७॥
श्रीजयदेवभणितरतिवञ्चितखण्डितयुवतिविलापम्
शृणुत सुधामधुरं विबुधा विबुधालयतोऽपि दुरापम्८

॥ श्लोकः ॥

त्वेदं पश्यन्त्याः प्रसरदनुरागं बहिरिव
प्रियापादालक्तच्छुरितमरुणद्योतिरुदयम् ।
ममाद्य प्रख्यातप्रणयभरभङ्गेन कितव
त्वदालोकः शोकादपि किमपि लज्जां जनयति॥२॥
प्रातर्नीलनिचोलमच्युतमुरःसंवीतपीतांशुकं
राधायाश्चकितं विलोक्य हसति स्वैरं सखीमण्डले।
व्रीडाचञ्चलमञ्चलं नयनयोराधापराधानने
स्वादुस्मेरमुखोऽयमस्तु जगदानन्दाय नन्दात्मजः३

इतिश्रीगीतगोविन्दे विलक्षलक्ष्मीपतिर्नामाष्टमः सर्गः ॥८ ॥

अथ नवमः सर्गः प्रारभ्यते

॥ आर्या ॥

अथ तां मन्मथखिन्नां रतिरसभिन्नां विषादसंपन्नाम्
अनुचिन्तितहरिचरितां कलहांतरितामुवाचरहःसखी

॥ गुर्जरीरागे रूपकताले अष्टपदी ॥ १ ॥

हरिरभिसराति वहति मधुपवने ।
किमपरमाधिकसुखं सखि भवने ।
माधवे मा कुरु मानिनि मानमये । ध्रु० ॥ १ ॥
तालफलादपि गुरुमतिसरसम् ।
किं विफलीकुरुषे कुचकलशम् । माध० ॥ २ ॥
कति न कथितमिदमनुपदमाचिरम् ।
मा परिहर हरिमातिशयरुचिरम् । माध० ॥ ३ ॥
किमिति विषीदसि रोदिषि विकला ।
विहसाति युवतिसभा तव सकला । माध० ॥ ४ ॥
सजलनलिनीदलशीलितशयने ।

हरिमवलोकय सफलय नयने । माध० ॥ ५ ॥
जनयसि मनसि किमिति गुरुखेदम् ।
शृणु मम वचनमनीहितभेदम् । माध० ॥ ६ ॥
हरिरुपयातु वदतु बहुमधुरम् ।
किमितिकरोषि हृदयमतिविधुरम् । माध० ॥ ७ ॥
श्रीजयदेवभणितमतिललितम् ।
सुखयतु रसिकजनं हरिचरितम् । माधव० ॥ ८ ॥

॥ श्लोकः ॥

स्निग्धे यत्परुषासि यत्प्रणमति स्तब्धासियद्रागिणि।
द्वेषस्थासि यदुन्मुखे विमुखतां यातासि तस्मिन्प्रिये।
तद्युक्तं विपरीतकारिणि तव श्रीखण्डचर्चा विषं
शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः॥
अन्तर्मोहनमौलिघूर्णनचलन्मन्दारविस्रंसनः
स्तब्धाकर्षणदृष्टिहर्षणमहामन्त्रः कुरङ्गीदृशाम् ।
दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखापदां
भ्रंशः कंसरिपोर्व्यपोहयतु वोऽश्रेयांसि वंशीरवः॥३॥
इति श्रीगीतगोविन्देमुग्धमुकुन्दो नाम नवमः सर्गः

अथ दशमः सर्गः प्रारभ्यते

॥ श्लोकः ॥

अत्रान्तरे मसृणरोषवशामसीम-
निःश्वासनिःसहमुखीं सुमुखीमुपेत्य ।
सव्रीडमीक्षितसखीवदनां दिनांते ।
सानंदगद्गदपदं हरिरित्युवाच ॥ १ ॥

देशवराडिरोग आडवताले अष्टपदी ॥ १ ॥

वदसि यदिकिंचिदपि दन्तरुचिकौमुदी
हरतिदरतिमिरमतिघोरम् ।
स्फुरदधरसीधवे तववदनचन्द्रमा
रोचयति लोचनचकोरम् ।
प्रिये चारुशीले प्रिये चारुशीले
मुञ्चमयि मानमनिदानम् ।
सपदि मदनानलो दहति मम मानसं

देहि मुखकमलमधुपानम् ॥ ध्रु० ॥ १ ॥
सत्यमेवासि यदि सुदति मयि कोपिनी
देहि खरनखरशरघातम् ।
घटय भुजबन्धनं जनय रदखण्डनं
येन वा भवति सुखजातम् । प्रिये० ॥ २ ॥
त्वमसि मम भूषणं त्वमसि मम जीवनं
त्वमसि मम भवजलधिरत्नम् ।
भवतु भवतीह मयि सततमनुरोधिनी
तत्र मम हृदयमतियत्नम् । प्रिये० ॥ ३ ॥
नीलनलिनाभमपि तन्वितवलोचनं
धारयति कोकनदरूपम् ।
कुसुमशरबाणभावेन यदि रञ्जयसि
कृष्णमिदमेतदनुरूपम् । प्रिये० ॥ ४ ॥
स्फुरतु कुचकुम्भयोरुपरि मणिमञ्जरी
रञ्जयतु तव हृदयदेशम् ।
रसतु रशनापि तव घनजघनमण्डले
घोषयतु मन्मथनिदेशम् । प्रिये० ॥ ५ ॥

स्थलकमलगञ्जनं मम हृदयरञ्जनं
जनितरतिरङ्गपरभागम् ।
भण मसृणवाणि करवाणि चरणद्वयं
सरसलसदलक्तकसुरागम् । प्रिये० ॥ ६ ॥
स्मरगरलखण्डनं मम शिरसि मण्डनं
देहि पदपल्लवमुदारम् ।
ज्वलति मयि दारुणो मदनकदनानलो
हरतु तदुपाहितविकारम् । प्रिये० ॥७॥
इति चटुलचाटुपटु चारु मुरवैरिणो
राधिकामधि वचनजातम् ।
जयति जयदेवकविभारतीभूषितं
मानिनीजनजनितशातम् । प्रिये०॥८॥

॥ श्लोकाः ॥

परिहर कृतातङ्के शङ्कां त्वया सततं घन-
स्तनजघनयाक्रान्ते स्वान्ते परानवकाशिनि ।
विशति वितनोरन्यो धन्यो न कोऽपि ममान्तरं

स्तनभरपरीरम्भारम्भे विधेहि विधेयताम् ॥ २॥
मुग्धे विधेहि मयि निर्दयदन्तदंशं
दोर्वल्लिबन्धनिबिडस्तनपीडनानि ।
चण्डि त्वमेव मुदमञ्चय पंचबाण-
चण्डालकाण्डदलनादसवः प्रयान्ति ॥ ३ ॥
शशिमुखि तव भाति भंगुरभ्रू-
र्युवजनमोहकरालकालसर्पी ।
तदुदितभयभंजनाय यूनां
त्वदधरसीधुसुधैव सिद्धमन्त्रः ॥ ४ ॥
व्यथयति वृथा मौनं तन्वि प्रपंचय पंचमं
तरुणि मधुरालापैस्तापं विनोदय दृष्टिभिः ।
सुमुखि विमुखीभावं तावद्वि मुंच न वंचय
स्वयमतिशयस्निग्धो मुग्धे प्रियोऽहमुपस्थितः॥५
बन्धूकद्युतिबान्धवोऽयमधरः स्निग्धो मधूकच्छवि-
र्गण्डश्चण्डि चकास्ति नीलनलिनश्रीमोचनं लोचनं
नासाभ्येति तिलप्रसूनपदवीं कुन्दाभदन्ति प्रिये
प्रायस्त्वन्मुखसेवया विजयते विश्वं स पुष्पायुधः ६

दृशौ तव मदालसे वदनमिन्दुमत्यान्वितं
गतिर्जनमनोरमा विधुतरम्भमूरुद्वयम्
रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवा-
वहो विबुधयौवनं वहसि तन्वि पृथ्वीगता ॥७॥
प्रीतिं वस्तनुतां हरिःकुवलयापीडेन सार्धं रणे
राधापीनपयोधरस्मरणकृत्कुम्भेन संभेदवान् ।
पत्रे बिभ्यति मीलति क्षणमभूत्क्षिप्रं तदालोकना-
त्कंसस्याथ जितं जितं जितमिति व्यालोलकोलाहलः ॥ ८ ॥

इति श्रीगीतगोविन्दे मानिनीवर्णने चतुरचतुर्भुजो नाम दशमः सर्गः० ॥ १० ॥

अथैकादशः सर्गः प्रारभ्यते

॥ श्लोकः ॥

सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं

गतवति कृतवेषे केशवे कुंजशय्याम् ।
रचितरुचिरभूषां दृष्टिमोषे प्रदोषे
स्फुरति निरवसादां कापि राधां जगाद ॥ १ ॥

वसन्तरागे रूपकताले अष्टपदी ॥ १ ॥

विरचितचाटुवचनरचनं चरणरचितप्रणिपातम् ।
संप्रति मञ्जुलवञ्जुलसीमनि केलिशयनमनुयातम्।
मुग्धे मधुमथनमनुगतमनुसर राधिके ध्रु०॥ १ ॥
घनजघनस्तनभारभरे दरमन्थरचरणविहारम् ।
मुखरितमणिमञ्जीरमुपैहि विधेहि मरालविकारम् २
शृणु रमणीयतरं तरुणीजनमोहनमधुरिपुरावम् ।
कुसुमशरासनशासनबन्दिनिपिकनिकरे भज भावम्
अनिलतरलकिसलयनिकरेण करेण लता निकुरम्बम्
प्रेरणमिव करभोरु करोति गतिं प्रतिमुञ्च विलम्बम्
स्फुरितमनङ्गतरङ्गवशादिव सूचितहरिपरिरम्भम् ।
पृच्छ मनोहरहारविमलजलधारममुं कुचकुम्भम् ।
अधिगतमखिलसखीभिरिदंतववपुरपिरतिरणसज्जम्

चण्डि रणितरशनारवडिण्डिममभिसरसरसमलज्जं।
स्मरशरसुभगनखेन सखीमवलम्ब्य करेण सलीलम्
चलवलयक्वणितैरवबोधय हरिमपि निजगतिशीलम्
श्रीजयदेवभणितमधरीकृतहारमुदासितवामम् ।
हरिविनिहितमनसामधितिष्ठतु कण्ठतटीमविरामम्

॥ श्लोकः ॥

सा मां द्रक्ष्यति वक्ष्यति प्रियकथां प्रत्यंगमालिंगनैः
प्रीतिं यास्यतिरंस्यते सखि समागत्येति चिंताकुलः
स त्वां पश्यति कम्पते पुलकयत्यानन्दति स्विद्यति
प्रत्युद्गच्छति मूर्च्छति स्थिरतमःपुंजे निकुंजे प्रियः २
अक्ष्णोर्निक्षिपदजनं श्रवणयोस्तापिच्छगुच्छावलिं
मूर्ध्नि श्यामसरोजदाम कुचयोः कस्तूरिकापत्रकम्
धूर्तानामभिसारसत्वरहृदां विष्वङ्निकुंजे सखि
ध्वान्तं नीलनिचोलचारु सुदृशां प्रत्यङ्गमालिङ्गति ३
काश्मीरगौरवपुषामभिसारिकाणा-
माबद्धरेखमभितो मणिमंजरीभिः ।

एतत्तमालदलनीलतमं तमिस्रं
तत्प्रेमहेमनिकषोपलतां तनोति ॥ ४ ॥
हारावलीतरलकाञ्चनकाञ्चिदाम-
केयूरकङ्कणमणिद्युतिदीपितस्य ।
द्वारे निकुञ्जनिलयस्य हरिं निरीक्ष्य ।
व्रीडावतीमथ सखी निजगाद राधाम् ॥ ५ ॥

वराडिरागे आडवताले अष्टपदी ॥ २ ॥

मञ्जुतरकुञ्जतलकेलिसदने प्रविश राधे ।
माधवसमीपमिह विलस रतिरभसहसितवदने १
नवभवाशोकदलशयनसारे प्रविश राधे ।
माधवसमीपमिह विलस कुचकलशतरलहारे २
कुसुमचयरचितशुचिवासगेहे प्रविश राधे ।
माधवसमीपमिह विलस कुसुमसुकुमारदेहे ॥ ३ ॥
चलमलयवनपवनसुरभिशीते प्रविश राधे ।
माधवसमीपमिह विलस रसवलितललितगीते
विततबहुवल्लिनवपल्लवघने प्रविश राधे ।

माधवसमीपमिह विलस चिरमिलितपीनजघने
मधुमिलितमधुपकुलकलितरावे प्रविश राधे ।
माधवसमीपमिह विलस मदनरभसरसभावे॥६
मधुतरलपिकनिकरनिनदमुखरे प्रविश राधे ।
माधवसमीपमिह विलस दशनरुचिरुचिरशिखरे
विहितपद्मावतीसुखसमाजे कुरु मुरारे ।
मङ्गलशतानीह भणति जयदेवकविराजराजे ॥८

॥श्लोकः॥

त्वां चित्तेन चिरं वहन्नयमतिश्रान्तो भृशं तापितः
कन्दर्पेण च पातुमिच्छति सुधासंबाधबिम्बाधरं।
अस्याङ्कं तदलंकुरु क्षणमिह भ्रूक्षेपलक्ष्मीलव-
क्रीते दास इवोपसेवितपदाम्भोजे कुतः संभ्रमः
सा ससाध्वससानन्दं गोविन्दे लोललोचना ।
सिञ्जानमञ्जुमञ्जीरं प्रविवेश निवेशनम्॥ ७ ॥

वराडिरागे रूपताले अष्टपदी ॥ ३ ॥

राधावदनविलोकनविकसित-

विविधविकारविभङ्गम् ।
जलनिधिमिव विधुमण्डलदर्शन-
तरलिततुङ्गतरङ्गम् ।
हरिमेकरसं चिरमभिलषितविलासम् ।
सा ददर्श गुरुहर्षवशंवद-
वदनमनङ्गनिवासम । ध्रु० ॥ १ ॥
हारममलतरतारमुरसि
दधतं परिलम्बितदूरम् ।
स्फुटतरफेनकदम्बकरम्बित-
मिवयमुनाजलपूरम् । हरि० ॥ २ ॥
श्यामलमृदुलकलेवरमण्डन-
मधिगतगौरदुकूलम् ।
नीलनलिनमिव पीतपराग-
पटलभरवलयितमूलम् । हरि० ॥ ३ ॥
तरलदृगञ्चलचलनमनोहर-
वदनजनितरतिरागम् ।
स्फुटकमलोदरखेलितखञ्जन-

युगमिव शरदि तडागम् । हरि० ॥४॥
वदनकमलपरिशीलनमीलित-
मिहिरसमकुण्डलशोभम् ।
स्मितरुचिरुचिरसमुल्लसिताधर-
पल्लवकृतरतिलोभम् । हरि० ॥ ५ ॥
शशिकिरणच्छुरितोदरजलधर-
सुन्दरकुसुमसुकेशम् ।
तिमिरोदितविधुमण्डलनिर्मल-
मलयजतिलकनिवेशम् । हरि० ॥ ६ ॥
विपुलपुलकभरदन्तुरितं रति-
केलिकलाभिरधीरम् ।
मणिगणकिरणसमूहसमुज्वल-
भूषणसुभगशरीरम् । हरि ०॥ ७ ॥
श्रीजयदेवभणितविभाव-
द्विगुणीकृतभूषणभारम् ।
प्रणमत हृदि विनिधाय हरिं
भवजलधिसुकृतोदयसारम् । हरि ॥ ८ ॥

॥ श्लोकाः ॥

अतिक्रम्यापाङ्गं श्रवणपथपर्यन्तगमन-
प्रयासेनैवाक्ष्णोस्तरलतरतारं पतितयोः।
इदानीं राधायाः प्रियतमसमालोकसमये
पपात स्वेदाम्बुप्रसर इव हर्षाश्रुनिकरः ॥ ९ ॥
भजन्त्यास्तल्पान्तं कृतकपटकण्डूतिपिहित-
स्मिते याते गेहाद्बहिरवहितालीपरिजने ।
प्रियास्यं पश्यन्त्याः स्मरशरवशाकूतसुभगं
सलज्जा लज्जापि व्यगमदिव दूरं मृगदृशः ॥९॥
जयश्रीविन्यस्तैर्महित इव मन्दारकुसुमैः
स्वयं सिन्दूरेण द्विपरणमुद्रा मुद्रित इव ।
भुजापीडक्रीडाहतकुवलयापीडकरिणः ।
प्रकीर्णासृग्बिन्दुर्जयति भुजदण्डो मुरजितः ॥१०॥
इति श्रीगीतगोविन्दे सानन्दगोविन्दो नामैका-
दशः सर्गः ॥ ११ ॥

॥ अथ द्वादशःसर्गःप्रारभ्यते ॥

॥ श्लोकः ॥

गतवतिसखीवृन्दे मन्दत्रपाभरनिर्भर-
स्मरशरवशाकूतस्फीतस्मितस्नापिताधराम् ।
सरसमनसं दृष्ट्वा राधां मुहुर्नवपल्लव-
प्रसवशयने विक्षिप्ताक्षीमुवाच हरिः प्रियाम्॥ १

विभासरागे एकतालीताले अष्टपदी १

किसलयशनतले कुरु कामिनि
चरणनलिनविनिवेशम् ।
तव पदपल्लववैरिपराभवमिदमनुभवतु सुवेशम् ।
क्षणमधुना नारायणमनुगतमनुसर भो राधिके।ध्रु०॥
करकमलेन करोमि चरणमह-
मागमितासि विदूरम्।
क्षणमुपकुरुशयनोपरि मामिव

नूपुरमनुगतिशूरम् । क्षणम० । ॥ २ ॥
वदनसुधानिधिगलितममृतमिव
रचय वचनमनुकूलम् ।
विरहमिवापनयामि पयोधर-
रोधकमुरसि दुकूलम् । क्षणम० ॥ ३ ॥
प्रियपरिरम्भणरभसवलितमिव
पुलकितमन्यदुरापम् ।
मदुरसि कुचकलशं विनिवेशय
शोषय मनसिजतापम् । क्षणम० ॥ ४ ॥
अधरसुधारसमुपनय भामिनि
जीवय मृतमिवदासम् ।
त्वयि विनिहितमनसं विरहानल-
दग्धवपुषमविलासम् । क्षणम० ॥ ५ ॥
शशिमुखि मुखरय मणिरशनागुण-
मनुगुणकण्ठनिनादम् ।
मम श्रुतियुगले पिकरवविकले
शमय चिरादवसादम् । क्षणम० ॥ ६ ॥

मामतिविफलरुषा विकलीकृत-
मवलोकितुमधुनेदम् ।
मीलति लज्जितमिव नयनं तव
विरम विसृज रतिखेदम् । क्षणम० ॥ ७ ॥
श्रीजयदेवभणितमिदमनुपम-
निगदितमधुरिपुमोदम् ।
जनयतु रसिकजनेषु मनोरम-
रतिरसभावविनोदम् । क्षणम० ॥ ८ ॥

॥ श्लोकः ॥

प्रत्यूहः पुलकांकुरेण निबिडाश्लेषे निमेषेण च
क्रीडाकूतविलोकितेऽधरसुधापाने कथाकेलिभिः ।
आनन्दाधिगमेन मन्मथकलायुद्धेऽपि यस्मिन्नभू-
दुद्भूतः स तयोर्बभूव सुरतारम्भः प्रियंभावुकः ॥ २ ॥
दोर्भ्यां संयमितः पयोधरभरेणापीडितः पाणिजै-
राविद्धो दशनैः क्षताधरपुटः श्रोणीतटेनाहतः ।
हस्तेनानामितः कचेऽधरमधुस्यंदेन संमोहितः

कान्तः कामपि तृप्तिमाप तदहो कामस्य वामा गतिः
माराङ्के रतिकेलिसंकुलरणारम्भे तया साहस-
प्रायं कान्तजयाय किञ्चिदुपरि प्रारम्भि यत्संभ्रमात्
निष्पन्दा जघनस्थली शिथिलिता दोर्वल्लिरुत्कम्पितं
वक्षो मीलितमक्षि पौरुषरसः स्त्रीणां कुतः सिद्ध्यति॥
तस्याः पाटलपाणिजाङ्कितमुरो निद्राकषाये दृशौ
निर्धूताधरशोणिमा विलुलितस्रस्तस्रजो मूर्द्धजाः।
काञ्चीदाम दरश्लथाञ्चलमिति प्रातर्निखातैर्दृशो-
रेभिः कामशरैस्तदद्भुतमहो पत्युर्मनः कीलितम्॥४
त्वामप्राप्य मयि स्वयंवरपरां क्षीरोदतीरोदरे
शङ्के सुन्दरि कालकूटमपिबन्मूढो मृडानीपतिः।
इत्थं पूर्वकथाभिरन्यमनसो विक्षिप्य वामाञ्चलं
राधायाः स्तनकोरकोपरिचलन्नेत्रो हरिः पातु वः॥५
व्यालोलः केशपाशस्तरलितमलकैः स्वेदलोलौ क-
पोलौ
स्पष्टा दष्टाधरश्रीः कुचकलशरुचा हारिता हारयष्टिः
कांचीकांचिद्गताशांस्तनजघनपदं पाणिनाछाद्य सद्यः

पश्यन्तीसत्रपं मा तदपि विलुलितस्रग्धरेयं धुनोति ७
ईषन्मीलितदृष्टिमुग्धहसितं सीत्कारधारावशा-
दव्यक्ताकुलकेलिकाकुविकसद्दन्तांशुधौताधरम् ॥
श्वासोन्नद्धपयोधरोपरि परिष्वङ्गात्कुरङ्गीदृशो
हर्षोत्कर्षविमुक्तनिःसहतनोर्धन्यो धयत्याननम् ॥८॥
अथ सहसासुप्रीतं सुरतस्यान्ते नितान्तखिन्नाङ्गी ।
राधा जगाद सादरमिदमानन्देन गोविन्दम् ॥ ९ ॥

रामकरीरागे रूपकताले अष्टपदी २

कुरु यदुनन्दन चन्दनशिशिर-
तरेण करेण पयोधरे ।
मृगमदपत्रकमत्र मनोभव-
मङ्गलकलशसहोदरे ।
निजगाद सा यदुनन्दने
क्रीडति हृदयानन्दने । ध्रु० ॥ १ ॥
अलिकुलगञ्जनसंजनकं
रतिनायकसायकमोचने ।
त्वदधरचुम्बनलम्बितकज्जल-

मुज्ज्वलय प्रियलोचने । नि० ॥ २ ॥
नयनकुरङ्गतरङ्गविलासनिरोध-
करे श्रुतिमण्डले ।
मनसिजपाशविलासधरे
शुभवेष निवेशय कुण्डले । नि० ॥ ३ ॥
भ्रमरचयं रचयन्तमुपरि रुचिरं
सुचिरं मम संमुखे ।
जितकमले विमले परिकर्मय
नर्मजनकमलकं मुखे । नि० ॥ ४ ॥
मृगमदरसवलितं ललितं कुरु
तिलकमलिकरजनीकरे ।
विहितकलङ्ककलं कमलानन
विश्रमितश्रमसीकरे । नि० ॥ ५ ॥
मम रुचिरे चिकुरे कुरु मानद
मनसिजध्वजचामरे ।
रतिगलिते ललिते कुसुमानि
शिखण्डिशिखण्डकडामरे । नि० ॥ ६ ॥

सरसघने जघने मम शम्बर
　　दारणवारणकन्दरे ।
मणिरशनावसनाभरणानि
　　शुभाशय वासय सुन्दरे । नि० ॥ ७ ॥
श्रीजयदेववचसि शुभदे हृदयं
　　सदयं कुरु मण्डने ।
हरिचरणाब्जस्मरणामृत-
　　कृतकलिकलुषज्वरखण्डने । नि० ॥ ८ ॥

॥ श्लोकः ॥

रचय कुचयोः पत्रं चित्रं कुरुष्व कपोलयो-
　　र्घटय जघने काञ्चीमञ्च स्रजा कवरीभरम् ।
कलय वलयश्रेणीं पाणौ पदे कुरु नूपुरा-
　　विति निगदितःप्रीतः पीताम्बरोऽपि तथाकरोत्।
पर्यङ्कीकृतनागनायकफणाश्रेणीमणीनां गणे
　　संक्रान्तप्रतिबिम्बसंकलनया बिभ्रद्वपुर्विक्रियाम्।
पादाम्भोरुहधारिवारिधिसुतामक्ष्णां दिदृक्षुः शतैः

कायव्यूहमिवाचरन्नुपचिताकूतो हरिः पातु वः॥ ११॥

यद्गान्धर्वकलासु कौशलमनुध्यानं च यद्वैष्णवं
यच्छृङ्गारविवेकतत्त्वरचनाकाव्येषु लीलायितम् ।
तत्सर्वं जयदेवपण्डितकवेः कृष्णैकतानात्मनः
सानन्दाः परिशोधयन्तु सुधियः श्रीगीतगोविन्दतः १२

साध्वीमाध्वीकचिंतानभवतिभवतः शर्करे कर्कशासि
द्राक्षे द्रक्ष्यन्ति के त्वाममृतमृतमसि क्षीर नीरं रसस्ते
माकन्दक्रन्द कान्ताधरधरणितलं गच्छ यच्छन्ति याव-
द्भावं शृङ्गारसारस्वतमिह जयदेवस्य विष्वग्वचांसि १३

श्रीभोजदेवप्रभवस्य रामा
देवीसुतश्रीजयदेवकस्य ।
पराशरादिप्रियवर्गकण्ठे
श्रीगीतगोविन्दकवित्वमस्तु ॥ १४ ॥

इति श्रीगीतगोविन्दे महाकाव्ये जयदेवपण्डितकृतौ प्रीतपीताम्बरो नाम द्वादशः सर्गः॥ इति शम्॥

अनेनैव कविना रचितोऽप्यद्यावधि क्वाप्यमुद्रितो गंगास्तवाख्यःप्रबन्धः

मधुमथनमूर्तिवर इन्दुकरकामुकं
वहसि वहु वारिसुतरङ्गे ।
हरिचरणनखभिदुरजगदण्डनिर्गता
ब्रह्मजलपात्रकृतसङ्गे ॥ १ ॥
नमो देवि गङ्गे नमो देवि गङ्गे
हर निखिलमघमलकनन्दे । ध्रुवम् ।
त्वमसि जनपाविनी चतुरुदधिगामिनी
सप्तर्षिकुलसुकृत सारे ।
कनकगिरिलंघिते सकलमुनिवन्दिते
हरमुकुटसितकुसुममाले । नमो० ॥ २ ॥
सगरसुतसंगमे लसदमरसुन्दरी-
दूतिके दुष्कृतिदुरापे ।
निरयगतिबाधके निर्वाणसाधके
भक्तजनहृतसंतापे । नमो० ॥ ३ ॥

तीर्थवरकारिणी पूर्वजोद्धारिणी
हिमशैलपाषाणभेदे ।
नागरं प्लावयसि पूरयसि सागरं
संगता विन्ध्यगिरिपादे । नमो० ॥ ४ ॥
शुभसलिलनिर्धौतपुलिनवति
कुर्वतस्तवनामनिर्मलालापम् ।
वन्दिता वीक्षिता चिन्तिताऽवगाहिता
मज्जिता मम हरसि पापम् । नमो० ॥ ५ ॥
इह निखिलमुनिगणैरिह निखिलसुरगणै-
रिहनिखिलवेदैरुदारे ।
पीयसे गीयसे स्तूयसे जन्हुमुनि-
कन्यके संसारसारे । नमो० ॥ ६ ॥
गण्डूषमिह मेऽवशतमधिजयतु तव
करनिकरगम्भीरतोये ।
परलोकबन्धुरसि सुन्दरसिन्धुरसि
तटिनि सुरसदनसाधनोपाये । नमो० ॥ ७ ॥
इति रामलक्ष्मणकौशिकानुज्ञया

सुरसरित्कृतनमस्कारम् ।
भणन्तमिह सादरं धीर जयदेवकवि-
मुत्तारयसि भवजलधिपारम् । नमो० ॥ ८ ॥
इति श्रीजयदेवपण्डितकृत गङ्गास्तवाख्यःप्रबन्धः

शुभं भवतु.